# .. Numbers and a list of Sanskrit categories ..

## ॥ संख्या वर्गवारी ॥

०

शुन्यत्त्व।

पूर्णमदः पुर्णमिदँ पुर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

१

ब्रह्म, एकाक्षर, पुरुष, प्रकृति, परमात्मा, एकजाती( शूद्र) ।

२

पक्ष- शुक्ल( शुद्ध), कृष्ण( वद्य) ।

शिर- प्रवृत्ति, निवृत्ति।

३

त्रिभुवन्( त्रिलोक) - स्वर्ग, मृत्यु, पाताल्।

त्रिमूर्ति- ब्रह्मा, विष्णु, महेश।

त्रिवेणीसङ्गम- (Confluence of) गंगा, यमुना, सरस्वती।

त्रिस्थली- काशी, प्रयाग्, गया।

त्रिकाल- भूत, वर्तमान, भविष्य।

त्रिगुण- सत्त्व, रजस, तमस।

Acccording to sA Nkhya

सप्तक- मद्र, मध्य, तार।

ईषणा- लोकेषणा, वित्तेषणा, दारेषणा।

पदे( शुद्ध-वैदिक-मार्ग) कर्म, उपासना, ज्ञान।

ज्योतिषस्कन्ध- सिद्धान्त, संहिता, होरा।

त्रिदण्डिन्- वाचा, मन, काया।

वाक्दंडोऽथ मनोदंडः कायदंडस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदंडीति स उच्यते ॥

त्रिवर्गः- धर्म, अर्थ, काम।

प्रस्थानत्रयी- ब्रह्मसूत्र, भगवद्गीता, वेदांत( उपनिषद्) ।

त्रिदोष( आयुर्वेदिक्) - कफ, वात, पित्त।

द्विजातिः- ब्राह्मण, क्षत्रिय, वैश्य।

जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते ।

त्रिपुरसुन्दरी- ज्ञानशक्ति, क्रियाशक्ति, इच्छाश्क्ति।

३ १/२ three and half

ॐकार-मात्रा- अ, उ, म, अर्धमात्रा अर्धचन्द्रबिन्दु।

मुहूर्त- वर्षप्रतिपदा( चैत्र शु. १),
विजयादशमी ( अश्विन शु. १०) ,
बलीप्रतिपदा( कार्तिक शु. १),
अर्ध - अक्षय्यतृतीया( वैशाख शु. ३)
अथवा नागपंचमी ( श्रावण शु. ५) ,

Alternative convention

वर्षप्रतिपदा( चैत्र शु. १),
विजयादशमी ( अश्विन शु. १०) ,
अक्षय्यतृतीया( वैशाख शु. ३)
अर्ध - बलीप्रतिपदा( कार्तिक शु. १),

४

अवस्था- जागृती, स्वप्न, सुषुप्ति, तुर्या।
देहावस्था- बाल्य, कौमारं, यौवनं, वार्धक्यं।
आश्रम- ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, संन्यास।
पुरुषार्थ( शृन्गो)( वर्ग)( भद्रं) - धर्म, अर्थ, काम, मोक्ष।
शरीर( पिण्डदेह) - स्थूल, सूक्ष्म( लिंग), कारण( पर), महाकारण।
युग- कृत( १७२८०००), त्रेता( १२९६०००), द्वापर( ८६४०००), कलि( ४३२०००) ।
वर्ण- ब्राह्मण, क्षत्रिय, वैश्य, शूद्र।

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ गीता १८-४१॥

वाणी( वाचा) - परा, पश्यन्ति, मध्यमा, वैखरी।
उपाय- साम, दाम, दण्ड, भेद।
वेद- ऋग्वेद, यजुर्वेद, सामवेद, अथर्वणवेद।
महावाक्य- प्रज्ञानं-ब्रह्म( ऋग्वेद), अहं-ब्रह्मास्मि( यजुर्वेद),
तत्वमसि( सामवेद), अयमात्मा-ब्रह्म( अथर्वणवेद) ।
मुखमुद्रा- खेचरी, भूचरी, चांचरी, अगोचरी।
उपाङ्गे- न्याय, मीमांसा, धर्म, पुराण।
भाग्य- उत्तम, मध्यम, कनिष्ठ, अदृष्ट( सूप्त) ।
देवप्रकार- प्रतिमा, अवतारी, साक्षी-अंतरात्मा,
निर्विकार-आत्मस्वरूप।
भिक्षुक( एकदंडिन्) - कुटीचक, बहूदक, हंस, परहंस।

कुटीचको बहूदको हंसश्चैव तृतीयकः ।
चतुर्थः परहंसश्च यो यः पश्चात् स उत्तमः ॥

चतुरङ्ग- गज, रथ, अश्व, पाद।

complete army including elephants, chariots, cavalry, infantry.

चतुष्पाणिः- शङ्ख, चक्र, गदा, पद्म।

कर्मयोग-चतुःसूत्री- कर्माधिकार्, फलाधिकारविरोध,
असंगकर्म, अकर्मण-विरोध।
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ गीता २-४७॥
चतुस्सार- काशिवास, सन्तसङ्ग, गंगाजल, शंकरसेवा।
असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां संगो गंगाभिः शंभुसेवनम् ॥ धर्मविवेक

## ५

पञ्चकन्या- अहिल्या, द्रौपदी, सीता, तारा, मन्दोदरी।
पञ्चगंध-
पञ्चगव्य- गोमुत्र, गोमय, दुग्ध, दधि, घृतं( आज्यं) ।
पञ्चमहाभूतम्- पृथ्वी, आप, तेज, वायू, आकाश।
पञ्चामृत- दुग्ध, दधि, घृतं, मधु, शर्करा।
दुग्धं च शर्करा चैव घृतं दधि तथा मधु ।
पञ्चावयव- प्रतिज्ञा, हेतु, उदाहरण, उपनय, निगमन।
पञ्चायतन( देवता) - शिव, देवी, गणेश, विष्णू, सूर्य।
पञ्चमाता- स्वमाता, पत्नीमाता, भ्रातुपत्नी, गुरुपत्नी, राजपत्नी।
पञ्चमहायज्ञ- देव, ब्रह्म, पितृ, भूत, नर।
A japa of Gayatri mantra is considered a substitution of these daily duties
पञ्चप्राण( प्राणपञ्चक) - प्राण, अपान, व्यान, उदान, समान।
पञ्चाङ्ग- तिथि( १५च१), वार( ७), नक्षत्र( २७च१), योग( २७), करण( ७) (see elsewhere) ।
अंगुली- अङ्गुष्ठ, तर्जनी, मध्यमा, अनामिका, कराङ्गुली।
ज्ञानेन्द्रिय( बुद्धिन्द्रिय) - श्रोत्र, त्वचा, चक्षु, जिव्हा, घ्राण।
श्रोत्रं त्वक्चक्षुषी जिव्हा नासिका चैव पंचमी ।
विषयपञ्चक( तन्मात्र) - शब्द, स्पर्श, रूप, रस, गन्ध।
कर्मेन्द्रीय- वाचा, पाणी, पाद, शिस्न, गुद।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ।
अंतःकरणपञ्चक- अंतःकरण, मन, बुद्धि, चित्त, अहङ्कार।
कोष- अन्नमय, प्राणमय, मनोमय, विज्ञानमय, आनन्दमय।
koSha are related to sharIrai, the sUkShma having middle three
पञ्चतत्त्व( मकार) - मद्य(fire), मांस(air), मत्स्य(water), मुद्रा(earth), मैथुन(ether) ।
These are tAntric principles elaborated in kulArNava tantra
पाण्डव- युधिष्ठिर्( धर्मराज्), अर्जुन, भीम, नकुल्, सहदेव।

पञ्चीकरण- उभारणी, संहारणी।??
पञ्चलक्षणं( पुराण) - सर्ग, प्रतिसर्ग, वंश, मन्वंतर, चरित।

सर्गश्च प्रतिसर्गश्च, वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥

पञ्चलवणं- काचक, सैधवं, सामुद्र, बिड, सौवर्चल।
पञ्चाग्नि- दक्षिण, गार्हपत्य, आहवनीय, सभ्य, आवसत्थ।
पञ्चबाण- अरविंदं, अशोकं, चूतं, नवमल्लिका, नीलोत्पलं।

अरविंदमशोकं च चूतं च नवमल्लिका ।
नीलोत्पलं च पंचैते पञ्चबाणस्य सयका ॥

पञ्चकर्म( आयुर्वेद) - वमन, रेचन, नस्य, अनुवासन, निरूह।
महापातकं- ब्रह्महत्या, सुरापानं, स्तेयं,
गुर्वङ्गनागमः, संसर्ग।

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महांति पातकान्याहुस्तत्संसर्गश्च पंचमम् ॥

पञ्चवटी- अश्वत्थ, बिल्व, वट, धात्री, अशोक।
पञ्चवल्कलं- न्यग्रोध, उदुंबर, अश्वत्थ, प्लक्ष, वेतस।
पञ्चसूनाः- चुल्ली, पेषणि, उपस्करः, कंडनी, उदुकुंभश्च।
पञ्चोपचार- गंध, पुष्प, धूप, दीप, नैवेद्य
पञ्चकारण- अधिष्ठानं, कर्ता, करणं, चेष्टा, दैवं।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् ॥ गीता १८-१४ ॥

६

षड्रिपु- काम, क्रोध, लोभ, मोह, मद, मत्सर।
षड्दर्शन- साङ्ख्य, योग, न्याय, वैशेषिक,
पूर्वमीमांसा, वेदान्त( उत्तरमीमांसा) ।
पदार्थ- द्रव्य,

vaisheshikA refers to six predicables

रामायण-काण्ड-
बाल्य, अयोध्या, अरण्य, किष्किंधा, सुन्दर, युद्ध।
ऋतु- वसन्त, ग्रीष्म, वर्षा, शरत्, हेमन्त, शिशिर।
वेदाङ्ग( षडांग) - शिक्षा, कल्प, व्याकरण, निरुक्त,
छंद, ज्योतिष।
षटकर्म- अध्ययन, अध्यापन, यजन, याजन, दान, प्रतिग्रह।

अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥

manusmiti

षट्कर्म( योग) - धौती, वस्ती, नेती, नौलिकी, त्राटक, कपालभाति।
षड्दुर्ग- धन्व, मही, गिरि, मनुष्य, मृत्, वन।
धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गं मृद्दुर्गं वनदुर्गमिति क्रमात् ॥
षट्प्रज्ञः- धर्म, अर्थ, काम, मोक्ष, लोकार्थ, तत्त्वार्थ।
धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि ।
षत्सु प्रज्ञा तु यस्यासौ षत्प्रज्ञः परिकीर्तितः ॥
ईश्वरगुणाः- समग्र, ऐश्वर्य( उत्पत्तिस्थितिलय), धर्म,
यश, श्री, ज्ञान, विज्ञान।

७

सप्ताहः( वासराः) - सोम( इन्दु), मङ्गल( भौम), बुध( सौम्य),
गुरु( बृहस्पति), शुक्र, शनि, रवि( भानु) ।
स्वर- षड्ज, ऋषभ, गन्धार्, मध्यम, पञ्चम, धैवत, निषाद।
करण( पञ्चांग) - बव, बालव, कौलव, तैतिल, गर, वणिज, विष्टि।
चक्र( मुख्य) - मुलाधार, स्वाधिष्ठान, मणिपूर, अनाहत,
विशुद्ध, अज्ञा, सहस्रार।
There are said to be eighty-eight thousand chakra-s in the human body . About thirty chakra-s are mentioned in texts . See 30
भाव- दास्य, सख्य, वात्सल्य, शान्त, कान्त, रति, द्वेश्य।
महाकाव्य- रघुवंश( कालिदस्), कुमारसंभव( कालिदस),
किराटार्जुनीय( भारवी), भट्टिकाव्य( भर्तृहरि),
शिशुपालवध( माघ), जानकीहरण( कुमारदास),
नैशधचरित( श्रीहर्ष) ।
रसातल- अतल, वितल, सुतल, रसातल, महातल, तलातल, पाताल।
स्वर्ग- भूः, भुवः, स्वः, महः, जनः, तपः, सत्यं।
समुद्र( अर्णव) - लवणाब्धि( नमक्), इक्षुसागर( ईख), सुरार्णव( मद्य),
आज्यसागर( घृत), दधिसमुद्र( दधि), क्षीरसागर( दुग्ध),
स्वादुजल( शुद्ध) ।
कुलाचल(mountains)- महेन्द्र, मलय, सह्यः, शुक्तिमान्,
ऋक्षवान्, विन्ध्य, पारियात्र।
महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षवानपि ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वता ॥
सप्तर्षि- काश्यप, अत्रि, भरद्वाज, विश्वामित्र, गौतम,
जमदग्नि, वसिष्ठ।
काश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः ॥

Alternative is मरीचि, अत्रि, अंगिरस, पुलस्त्य, पुलह, क्रतु, वसिष्ठare attributed to the saptarShI constellations, which is known as ursa-major . A small star near vasiShTha is named after his wife arundhatI

सप्तद्वीप- जम्बु, प्लक्ष, शाल्मल, कुश, क्रौञ्च, शाक, पुष्कर।

जम्बुप्लक्षाभिधानौ च शाल्मकश्च कुशस्तथा ।
क्रौञ्चशाकौ पुष्करश्च ते सर्वे देवभूमयः ॥

सप्तवन- दण्डकारण्य, खण्डारण्य, चम्पकारण्य, वेदारण्य, नैमिषारण्य, ब्रह्मारण्य, धर्मारण्य।

mentioned in Ramayana

मोक्षपुरी- अयोध्या, मथुरा, माया( हरिद्वार्), काशी, काञ्चि, अवन्तिका( उज्जयिनी), द्वारावती( द्वारका) ।

व्यसन- द्यूत, वेश्यागमन, चोरी, चहाडी, परदारारमण, लघुपक्षीक्रीडा, किन्नरीगायन।

सप्तपदी(vedic marriage steps)

सप्तप्रकृतिः( राज्य) - स्वामि, अमात्य, सुहृत्, कोश, राष्ट्र, दुर्ग, बल।

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ।

amarakoshasya

८

अष्टवसु- धरो( धव), धृव, सोम, अह( आप), अनिल, अनल, प्रत्यूष, प्रव्हास।

धरो धृवश्च सोमश्च अहश्चैवानिलोनलः ।
प्रत्यूषश्च प्रव्हासश्च वसवोऽष्टाविनिःस्मृताः ॥

अष्टविवाह- ब्राह्म, दैव, आर्ष, प्राजापत्य, सुर, गंधर्व, राक्षर, पिशाच्च।

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथा सुरः ।
गांधर्वोराक्षरश्चैव पैशाचष्चाष्टमोऽधमः ॥

दिक्पाल- इंद्र( पूर्व), अग्नि( आग्नेय), यम( दक्षिण), निॠति( नैॠत्य), वरुण( पश्चिम), वायु( वायव्य), सोम( उत्तर), ईश्वर( ईशान्य) ।

The Amara-kosha (6-4 or verse 149) has:

इन्द्रो वन्हिः पितृपतिर्नैॠतो वरुंओ मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रम्मत् ॥

अष्टांगयोग- यम, नियम, आसन, प्राणायाम, प्रत्याहार, ध्यान, धारणा, समधी।

अष्टांग( नमस्कार) - जानुभ्यां, पद्भ्यां, पणिभ्यां, उर, शिर।

जानुभ्यां च तथा पद्भ्यां पणिभ्यामुरसा धिया ।
शिरसा वचसा दृष्ट्या प्राणामोऽष्टांग ईरितः ॥

चिरंजीव- अश्वत्थामा, बलिः, व्यास, हनूमान, बिभीषण,
कृपः, परशुरामः, मार्कण्डेय।

अष्टमहासिद्धि-

अष्टभोग( त्रिगुणासहितपञ्चभोग) - अन्न, उदक, तांबूल, पुष्प,
चंदन, वसन, शय्या, अलङ्कार।

अष्टधाप्रकृति( त्रिगुणासहपञ्चभूते) - सत्त्व, रज, तम,
पृथ्वी, आप, तेज, वायू, आकाश।

देहाष्टकतत्त्व- देह, अवस्था, अभिमान, स्थान, भोग, मात्रा,
गुण, शक्ति।

अष्टमैथुनं- स्मरण, कीर्तन, केलिः, प्रेक्षणं, गुह्यभाषणम्,
सङ्कल्प, अध्यवसाय, क्रियानिष्पत्ति।
स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥

अष्टकर्मन्( गतिक) - आदाने, विसर्गे, प्रैषनिषेधयोः,
अर्थवचने व्यवहारस्य इक्षणे,
दंडशुद्धयोः, रक्तः।
आदाने च विसर्गे च तथा प्रैषनिषेधयोः ।
पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे ।
दंडशुद्धयोः सदा रक्तस्तेनाष्टगतिको नृपः ॥

अष्टगुण( ब्राह्मणस्य-अपेक्षित) - दया( सर्वभूतेषु), क्षांति,
अनसूया, शौचं, अनायास, मङ्गल, अकार्पण्य, अस्पृहा।

अष्टगजाः- ऐरावत, पुंडरीक, वामन, कुमुद, अजन,
पुष्पदन्त, सार्वभौम, सुप्रतीक।
ऐरावतः पुंडरीको वामनः कुमुदोऽजनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥

अष्टधातु- स्वर्ण, रूप्य, ताम्रं, रंगं यशद,
शीस, लोह, रस।
स्वर्णं रूप्यं च ताम्रं च रंगं यशदमेवच ।
शीसं लोहं रसश्चेति धातवोऽष्टौ प्रकीर्तिताः ॥

अष्टमंगलं- मृगराज, वृष, नाग, कलश, व्यंजन,
वैजयंती, भेरी, दीप।
मृगराजो वृषो नागः कलशो व्यंजनं तथा ।
वैजयंती तथा भेरी दीप इत्यष्टमंगलम् ॥

अष्टमूर्ति( शिव) - जल, वन्हि, यष्टा, सूर्य, चंद्र,

आकाश, वायु, अवनी।
जलं वन्हिस्तथा यष्टा सूर्याचंद्रमसौ तथा ।
आकाशं वायुरवनी मूर्तयोऽष्टौ पिनाकिनः ॥

अष्टलक्ष्मि- आदि, सनातन, गज, ऐश्वर्य, धन,
धान्य, विजय, वीर।

९

नवग्रह- सूर्य, चन्द्र, मङ्गल, बुध, गुरु, शुक्र, शनि, राहू, केतू।
नमः सूर्याय चन्द्राय मङ्गलाय बुधाय च ।
गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ॥
ब्रह्मामुरारिस्त्रिपुरान्तकारी
भानुः शशीभूमिसुतो बुधश्च ।
गुरुश्च शुक्रश्च शनिराहुकेतवाः
कुर्वंतु सर्वे मम सुप्रभातम् ॥

नवविधाभक्ति- श्रवण, कीर्तन, स्मरण, पादसेवन,
वन्दन, दास्य, आत्मनिवेदन।
श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यं आत्मनिवेदनम् ॥

नवद्वार- द्विचक्षुः, द्विकर्ण, द्वौघ्राणछिद्र, मुख, उपस्थ, गुद।

नवरस- शृंगार, हास्य, करुण, रौद्र, वीर, भयानक,
बीभत्स, अद्भुत, शांत।
शृंगारहास्यकरुणाः रौद्रवीरभयानकाः ।
बीभत्साद्भूतशान्ताश्च रसाः पूर्वैरुदाहृताः ॥

स्थायीभावाः- रति, हास, शोक, क्रोध, उत्साह, भय, जुगुप्सा,
विस्मय, शमाः( निर्वेद) ।
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयशमाः स्थायी भावा अमी क्रमात् ॥

नवनाग- अनंत, वासुकि, शेष, पद्मनाभ, कंबल,
शङ्खपाल, धृतराष्ट्र, कालिय, तक्षक।

नवखण्ड- इलावृत्त, भद्राश्व, हरिवर्ष, किंपुरुष, केतुमाल,
रम्यक, भरतवर्ष, हिरण्मय, उत्तरकुरु।

कालगणना- ब्राह्म, दिव्य, पित्र्य, प्राजापत्य, बार्हस्पत्य, सौर,
सावन, चंद्र, आर्क्ष( नाक्षत्र) ।
ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ।
सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव ।
चतुर्भिर्व्यवहारोऽत्र सौरचांद्रर्क्षसावनैः ॥
सौर, चान्द्र, नाक्षत्र, सावन(sunrise to sunrise)

are commonly followed.

नवरत्न( विक्रमादित्य) - धन्वंतरि, क्षपणक, अमरसिंह, शंकु,
वेतालभट्ट, घटकर्पर, कालिदास, वराहमिहिर,
वररुचि( कात्यायन) ।

धन्वंतरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्थ ॥

नवनिधि( कुबेर) - महापद्म, पद्म, शंख, मकर, कच्छ,
मुकुंद, कुंद, नील, खर्व।

महापद्मश्च पद्मश्च शंखो मकरकच्छपौ ।
मुकुंदकुंदनीलाश्च खर्वश्च निधयो नव ॥

१०

दशावतार्- मत्स्य, कूर्म, वराह, नरसिंह, वामन,
परुशुराम, राम, कृष्ण, बुद्ध, कल्की।

मत्स्यः कूर्मो वराहश्च नरसिंहोथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥

थाट- बिलावल्, खमाज, कल्याण, काफी, मारवा, पूर्वी,
आसावरी, भैरव, तोडी, भैरवी।

दशदिशा- पूर्वा( प्राची), पश्चिमा( प्रतीची), उत्तरा( उदीची),
दक्षिणा( अवाची),
आग्नेयी, नैऋता, वायव्या, ऐशानी, अध, ऊर्ध्व।

११

रुद्र- रैवत, अज, भीम, भव, वाम, वृषाकपि, अजैकपाद, उग्र,
अहिर्बुध्न्य, बहुरूप, महान।

१२

राशि- मेष, वृषभ, मिथून्, कर्क, सिंह, कन्या, तूळ,
वृश्चिक्, धनु, मकर, कुंभ, मीन।

मास- चैत्र, वैशाख, ज्येष्ठ, आषाढ, श्रावण, भाद्रपद,
आश्विन्, मार्गशीर्ष, पौष, माघ, फाल्गुन।

Months- January, February, March, April, May, June, July, August,
September, October, November, December ।

आदित्य- धातु, मित्र, अर्यमा, रुद्र, वरुण, सूर्य, भग, विवस्वत्,
पूषन्, सवितृ, त्वष्टा, विष्णु।

द्वादश-ज्योतिर्लिङ्ग-

१४

भुवन- सप्तरसातल, सप्तस्वर्ग (see above).
माया- चैतन्य, गुणसाम्य, अर्धनारीनटेश्वर, षड्गुणेश्वर,
प्रकृतिपुरुष, शिवशक्ति, शुद्धसत्त्व, गुणक्षोभिणी, सत्त्व,
रज, तम, मन, माया, अंतरात्मा।
विद्या- ऋग्वेद, यजुर्वेद, सामवेद, अथर्वणवेद(वेद),
शिक्षा, कल्प, व्याकरण, निरुक्त, छंद, ज्योतिष(वेदाङ्ग),
न्याय, मीमांसा, धर्म, पुराण(उपाङ्ग)।
षडंगमिश्रिता वेदा धर्मशास्त्रं पुराणकं ।
मीमांसा तर्कमपि च एता विद्याश्चतुर्दश ॥
मनु- स्वायंभुव्व, स्वारोचिष, उत्तम, तामस, रैवत, चाक्षुष,
वैवस्वत, सावर्णि, दक्षसावर्णि, ब्रह्मसावर्णि, धर्मसावर्णि,
रुद्रसावर्णि, रुचि(देवसावर्णि), भूति(इंद्रसावर्णि)।
स्वयंभूः स्वरोर्चिर्मनुश्चोत्तमाख्यस्ततस्तामसो
रवतश्चाक्षुषश्च ।
सवैवस्वतः पञ्चसावर्णिरेवं रुचित्भूतिरुक्ता
इमे दैवविद्भिः ॥
रत्नानि- लक्ष्मी, कौस्तुभ, पारिजातक, सुरा, धन्वंतरि,
चंद्र, गावः(कामधेनु), गज(सुरेश्वर), रंभादिदेवाङ्गना,
अश्वः(सप्तमुखः), विषं, शङ्करधनुः, शङ्ख, अमृत।
लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वंतरिश्चंद्रमा ।
गावः कामदुधाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः ॥
अश्वः सप्तमुखो विषं हरिधनुः शङ्खोऽमृतं चांबुधे ।
रत्नानीह चतुर्दशं प्रतिदिनं कुर्यात्सदा मङ्गलम् ॥
स्वर vowels - अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ए, ऐ, ओ, औ, अं, अः।

१५

तिथि- प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी,
सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी,
त्रयोदशी, चतुर्दशी, पौर्णिमा, (अमावस्या)।

१६

शोडषसंस्कार- गर्भाधान, पुंसवन, अनवलोभन,
सीमंतोन्नयन, जातकर्म, नामकर्म, निष्क्रमण, अन्नप्राशन,
चौल, उपनयन, महानाम्नीव्रत, महाव्रत, उपनिषद्व्रत,
गोदानव्रत(चतुर्वेदव्रत), समावर्तन, विवाह।
शोडषस्प्रमेय(१६)-
nyAya philosophy mentions 16 topics of discussion
षोडशोपचार( देवार्थ) - आसन, स्वागत, पाद्यं, अर्घ्यं, आचमन,

मधुप, अर्काच, स्नानं, वसन, आभरण,
गन्ध, पुष्प, धूप, दीप, नैवेद्य, वंदनं।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्काचमस्नानं वसनाभरणानि च ।
गन्धपुष्पे धूपदीपौ नैवेद्यं वंदनं तथा ।

षोडशोपचार्( २) - आवाहन, आसन, पाद्य, अर्घ्य, आचमन, स्नान, वस्त्र, उपवीत, गंध, पुष्प, धूप, दीप, नैवेद्य, प्रदक्षिणा, नमस्कार, विसर्जनं।
आवाहनासनेपाद्यमर्घ्यमाचमनीयकम् ।
स्नानंवस्त्रोपवीते च गंधं पुष्पेच धूपकम् ।
दीपरान्न नमस्कारः प्रदक्षिणा विसर्जने ॥

this is an alternative

षोडशकलाः( चंद्रस्य) - अमृता, मानदा, पूषा, तुष्टिः, पुष्टी, रतिः, धृतिः, शशिनी, चंद्रिका, कांति, ज्योत्स्ना, श्रीः, प्रीतिः, अंगदा, पूर्णा, मृता।
अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ।
शशिनी चंद्रिका कांतिज्योत्स्ना श्रीः प्रीतिरेव च ।
अंगदा च तथा पूर्णामृता षोडश वै कलाः ॥

षोडशमातृका( मातृदेवी) - गौरी, पद्मा, शची, मेधा, सावित्री, विजया, जया, देवसेना, स्वधा, स्वाहा, शांतिः, पुष्टिः, धृतिः, तुष्टिः, कुलदेवता, आत्मदेवताः।
गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।
शांतिः पुष्टिर्धृतिस्तुष्टिः कुलदेवात्मदेवताः ॥

षोडषवर्ग-ज्योतिष( भाग) - राशि( १), होर( २), द्रेष्काण( ३), चतुर्थांश( ४), त्रिंशांश( ५), सप्तमांश( ७), नाडि-अंश( नवांश)( ९), दशांश( १०), द्वादशांश( १२), षोडशांश( १६), विंशांश( २०), सिद्धांश( २४), भांश( २७), चत्वारिंशंश( ४०), अक्षवेदांश( ४५), षष्ठ्यांश( ६०) ।

१८

भगवद्गीताऽध्यायाः( योग) - Available in Devanagari and text, and meanings at http://chandra.cis.brown.edu/isongs/sindex.html, OR http://rbhatnagar.csm.uc.edu:8080/hindu_universe.html.

अर्जुनविषाद, साङ्ख्य, कर्म, ज्ञानकर्मसंन्यास, संन्यास, आत्मसंयम, ज्ञानविज्ञान,

अक्षरब्रह्म, राजविद्याराजगुह्य, विभूति, विश्वरूपदर्शन,
भक्ति, क्षेत्रक्षेत्रज्ञविभाग, गुणत्रयविभाग, पुरुषोत्तम,
दैवासुरसंपद्विभाग, श्रद्धात्रयविभाग, मोक्षसंन्यास।

महाभारत-पर्व-
Available in Devanagari and text at
http://rbhatnagar.csm.uc.edu:8080/hindu_universe.html.

आदि, सभा, वन, विराट,
उद्योग, भीष्म, द्रोण, कर्ण,
शल्य, सौप्तिक, स्त्री, शांति,
अनुशासन, अश्वमेधिक, आश्रमवासिक,
मौसल, महाप्रस्थानिक, स्वर्गारोहणपर्व।

पुराण- ब्रह्म, पद्म, विष्णु, शिव, भागवत,
नारद, मार्कंडेय, अग्नि, भविष्य, ब्रह्मवैवर्त, लिंग,
वाराह, स्कांद, वामन, कुर्म, मत्स्य, गरुड, ब्रह्माण्ड।

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथान्यनारदीयं च मार्कंडेयं च सप्तमम् ॥
आग्नेयमष्टकं प्रोक्तं भविष्यन्नवमं तथा ।
दशमं ब्रह्मवैवर्त लिंगमेकादशं तथा ॥
वाराहं द्वादशं प्रोक्तं स्कांदं चात्र त्रयोदशम् ।
चतुर्दशं वामनं चैव कौर्मं पंचदशं तथा ॥
मात्स्यं च गारिडं चैव ब्राह्माण्डाष्टादशं तथा ॥

उपपुराण- सनत्कुमार, नरसिंह, नारद, शिवधर्म,
आश्चर्य, मन, कपिल, मानव, शनसेरित, ब्रह्माण्ड, वरुण,
कालिका, महेश्वर, शांब, सौर, प्रवर, भागवत, भागवत।

अष्टान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परं ।
तृतीय नारदं प्रोक्तं कुमारेण तु भाषितं ।
चतुर्थं शिवधर्माख्यं साक्षान्नंदीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमनः परम् ।
कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्मांडं वारुणं चाथ कालिकाह्वयमेव च ।
माहेश्वरं तथा शांबं सौरं सर्वार्थसंचयम् ।
पराशरोक्तं प्रवरं तथा भागवतद्वयम् ।
इदमष्टादशं प्रोक्तं पुराणं कौर्मसञ्ज्ञितम् ।
चतुर्धा संस्थितं पुण्यं संहितानां प्रभेदतः ॥

अष्टादशविद्या- चतुर्दशविद्या, आयुर्वेद, धनुर्वेद, गांधर्व,

अर्थशास्त्रं।

see above for fourteen(chaturdasha) vidyA

२१

स्वर्ग- ज्योति, सित, विमल, अभिआगत, प्रकाश, रम्य, सहज, सिद्ध, नाद, दिव्य, अकांत, स्थिर, तृप्ति, निर्मल, प्रेमल, निज, लय, अनंत, नित्य, अतीत, सच्चिदानन्द।

२४

चतुर्विंशतिगुण( २४) -

there are 24 according to vaisheshikA system

चतुर्विंशतिसिद्धि( २४) -

aShTamahAsiddhi are more known

२५

सूक्ष्मदेहतत्त्व- अंतःकरणपञ्चक, प्राणपञ्चक, विषयपञ्चक, पञ्चकर्मेन्द्रिय, पञ्चज्ञानेन्द्रिय।

thatness specified in sA Nkhya philosophy

२७

नक्षत्र- अश्विनी, भरणी, कृत्तिका, रोहिणी, मृग, आर्द्रा,
पुनर्वसू, पुष्य, अश्लेषा, मघा, पूर्वा-फाल्गुनी,
उत्तरा-फाल्गुनी, हस्त, चित्रा,
स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूळ, पूर्वाषाढा,
उत्तराषाढा, श्रवण, धनिष्ठा, शततारका,
पूर्वाभाद्रपदा, उत्तराभाद्रपदा, रेवती।

Last 1/4th of uttarAShADhA and 1/15th of shravaNa is treated
अस् अभिजित् नक्षत्र अन्द् इस् उसेद् फ़ोर् मुहुर्त

योग( पञ्चांग) - विष्कम्भ, प्रीति, आयुष्मान, सौभाग्य,
शोभन, अतिगण्ड, सुकर्मा, धृति, शूल, गण्ड, वृद्धि,
ध्रुव, व्याघात, हर्षण, वज्र, सिद्धि, व्यतिपात, वरीयान,
परिघ, शिव, सिद्ध, साध्य, शुभ, शुक्ल, ब्रह्मा, यैंद्र,
वैधृति।

विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥
गण्डो विद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रं सिद्धिर्व्यतीपातो वरीयन् परिघः शिवः ।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मैन्द्रो वैधृतिस्तथा ॥

२८

अष्टविंशति-आगमा-

according to shaivite tradition there

are 28 AgamA-s and 108 upAgamA-s

३३

त्रिदश-देवाः( ३३) -

Rigveda refers thirty three symbolic gods, eleven deities presiding over three spheres . Shatapatha brAhmaNa relates them to be eight vasus, eleven rudra, twelve Aditya, dyaus the the sky god and pRithvI the earth goddess

The mystic number 33 appears in relation to number of gods

संवत्सर- प्रभव, विभव, शुक्ल, प्रमोद, प्रजापति,
अङ्गिरा, श्रीमुख, भाव, युव, धातृ,
ईश्वर, बहुधान्य, प्रमाथी, विक्रम, वृष,
चित्रभानु, सुभानु, तारण, पार्थिव, व्यय,
सर्वजित्, सर्वधारी, विरोधी, विकृति, खर,
नन्दन, विजय, जय, मन्मथ, दुर्मुख,
हेमलंबी, विलंबी, विकारी, शार्वरी, प्लव,
शुभकृत्, शोभनः, क्रोधी, विश्वावसु, पराभव,
प्लवङ्ग, कीलक, सौम्य, साधारण, विरोधकृत्,
परिधावी, प्रमादी, आनन्द, राक्षस, अनल,
पिङ्गल, कालयुक्त, सिद्धार्थी, रौद्र, दुर्मती,
दुन्दुभि, रुधिरोद्गारी, रक्ताक्षी, क्रोधन, क्षय।
प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥
ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलंबी विलंबी च विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥
प्लवङ्गः कीलकः सौम्यः साधारणविरोधकृत् ।
परिधावी प्रमादी च आनन्दो राक्षसोऽनलः ॥
पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥

३५

व्यञ्जन consonents - क, ख, ग, घ, ङ, च, छ, ज, झ, ञ,
ट, ठ, ड, ढ, ण, त, थ, द, ध, न, प, फ, ब, भ, म,
य, र, ल, व, श, ष, स, ह, क्ष, ज्ञ (३६ मराठी ळ)।

६४

चतुषष्टिस्कलाः(६४)-

64 forms of arts

आकर-ज्ञानम्

आकर्षण-क्रीडा

आलेख्यम्

अभिधान-कोष-छन्दो-ज्ञानम्

अक्षर-मुष्टिका-कथनम्

बालक-क्रीडनकानि

भूषण-योजनम्

चलितकयोगाः

चित्रा योगाः

चित्रशाकापूप-भक्ष्य-विकार-क्रिया

दशन-वसनाङ्गरागाः

देश-भाषा-ज्ञानम्

धारण-मातृका

धातु-वादः

दुर्वचकयोगाः

द्यूत-विशेषः

गन्ध-युक्तिः

गीतम्

हस्त-लाघवम्

इन्द्रजालम्

काव्य-समस्या-पूरणम्

कर्ण-पत्त्र-भङ्गाः

कौचुमार-योगाः

केश-मार्जन-कौशलम्

केश-शेखरापीडयोजनम्

क्रिया-विकल्पाः

माल्य-ग्रन्थन-विकल्पाः

मानसी-काव्य-क्रिया

मणि-भूमिका-कर्म

मणि-राग-ज्ञानम्

मेष-कुक्कुट-लावक-युद्ध-विधिः

म्लेच्छितक-विकल्पाः

नाटकाख्यायिका-दर्शनम्

नाट्यम्

नेपथ्य-योगाः
नृत्यम्
पानक-रसरागासव-योजनम्
पट्टिका-वेत्रबाण-विकल्पाः
प्रहेलिका
प्रतिमा
पुष्प-शकटिका-निमित्त-ज्ञानम्
पुष्पास्तरणम्
पुस्तक-वाचनम्
रूप्य-रत्न-परीक्षा
संपाठ्यम्
शयनस्रचनम्
शुक-सारिका-प्रलापनम्
सूचीवाप-कर्म
तक्षणम्
तण्डुल-कुसुम-बलिविकाराः
तर्कू-कर्माणि
उदक-घातः
उदकस्वाद्यम्
उत्सादनम्
वाद्यम्
वास्तु-विद्या
वैजयिकीनां विद्यानां ज्ञानम्
वैनायिकीनां विद्यानां ज्ञानम्
वस्त्र-गोपनानि
वीणा-डम-रुक-सूत्र-क्रीडा
विशेषक-छेद्यम्
वृक्षायुर्वेद-योगाः
यन्त्र-मातृका
श्कलानिधिघ
१०० 
कौरव- दुर्योधन, दुःशासन, दुर्मुख, दुःशल, सुबाहु, युयुत्सु।
१०८
उपनिषद्-
ईश, केन, कठ, प्रश्न, मुण्डक, माण्डुक्य, तैत्तिरीय, ऐतरेय,
छान्दोग्य, बृहदारण्यक ( १०), ब्रह्म, कैवल्य, जाबाल( अथर्ववेद),

श्वेताश्वतर, हंस, आरुणेय, गर्भ, नारायण, परमहंस,
अमृत-बिन्दु ( २०), अमृत-नाद, अथर्व-शिर, अथर्व-शिख,
मैत्रायणि, कौषीताकि, बृहज्जाबाल, नृसिंहतापनी,
कालाग्निरुद्र, मैत्रेयि, सुबाल ( ३०), क्षुरिक, मन्त्रिक, सर्व-सार,
निरालम्ब, शुक-रहस्य, वज्र-सूचिक, तेजो-बिन्दु, नाद-बिन्दु,
ध्यानबिन्दु, ब्रह्मविद्या ( ४०), योगतत्त्व, आत्मबोध, परिव्रात्
( नारदपरिव्राजक), त्रि-षिखि, सीतोपनिषद्( सीत अथवा सीता),
योगचूडामणि, निर्वाण, मण्डलब्राह्मण, दक्षिणामूर्ति, शरभ ( ५०),
स्कन्द, ( त्रिपाड्विभूटि)- महानारायण, अद्वयतारक, रामरहस्य,
रामतापणि, वासुदेव, मुद्गल, शाण्डिल्य, पैंगल, भिक्षु ( ६०),
महत्-शारीरक, योगशिखा, तुरीयातीत, संन्यास,
परमहंस-परिव्राजक, अक्षमालिक, अव्यक्त, एकाक्षर,
अन्नपूर्ण ( ७०), सूर्य, अक्षि, अध्यात्मा, कुण्डिकोपनिषद्, सावित्रि,
आत्मा, पाशुपत, परब्रह्म, अवधूत, त्रिपुरातपनोपनिषद् ( ८०),
देवि, त्रिपुर, कर, भावन, रुद्र-हृदय, योग-कुण्डलिनि,
भस्मोपनिषद्, रुद्राक्ष, गणपति, दर्शन ( ९०), तारसार,
महावाक्य, पञ्च-ब्रह्म, प्राणाग्नि-होत्र, गोपाल-तपणि,
कृष्ण, याज्ञवल्क्य, वराह, शात्यायनि, हयग्रीव ( १००),
दत्तात्रेय, गारुड, कलि-सण्टारण, जाबाल( सामवेद), सौभाग्य,
सरस्वती-रहस्य, बह्वृच, मुक्तिक।

शिवनाम-

गणेशनाम-

दुर्गानाम- Available as a separate file(Devanagari and text).
लक्ष्मीनाम- Work in progress . Will be available in nAmAvalI form.

रामनाम-

विष्णुनाम-

१०००

शिवसहस्रनाम- Available as a separate file(Devanagari and text).
गणेशसहस्रनाम- Work in progress . Will be available as a separate file(Devanagari and text).
ललितासहस्रनाम- Work in progress . Will be available as a separate file(Devanagari and text).
विष्णुसहस्रनाम-
Available as a separate file(Devanagari and text) both shloka-s and nAmAvalI.

infinity

पूर्णत्त्व, अनंत।

पूर्णमदः पुर्णमिदँ पुर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ।

Encoded and proofread by NA

---

Please send corrections to sanskrit@cheerful.com
Last updated May 15, 2011
http://sanskritdocuments.org